# अन्तर्दौवारिकक्रीडास्पर्धाः

## दिनाङ्कः - १४.०३.२०२०

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य सुदृढभारताभियानम् इत्युपक्रमान्तर्गतत्वेन राष्ट्रियसंस्कृतविद्यापीठे १४.०३.२०२० दिनाङ्के छात्रेभ्यः अध्यापकेभ्यः अध्यापकसहकर्मचारिभ्यश्च अन्तर्दौवारिकक्रीडास्पर्धाः समायोज्यन्त । मान्याः कुलपतयः आचार्याः वि. मुरलीधरशर्ममहोदयाः कार्यक्रमस्य उद्घाटनं विधाय शारीरिकमानसिकस्वास्थ्याय अन्तर्दौवारिकक्रीडानां महन्महत्त्वं प्रत्यपादयन् । शारीरिकविभागस्य सहायकनिर्देशकः श्रीमान् सेतुराममहोदयः क्रीडानां स्वास्थ्यस्य शारीरिकसुदृढतायाश्च संक्षिप्तविवरणं प्रदाय इतिहासमप्यवोचत् । अस्मिन् कार्यक्रमे छात्राः अध्यापकाः शिक्षकसहकर्मचामरिणश्च सहभागं स्व्यकार्षुः । सुदृढभारताभियानान्तर्गतः तया छात्रैः अध्यापकैः शिक्षकसहकर्मचारिभिश्च अनेकाः अन्तर्दौवारिकक्रीडाः अक्रीड्यन्त ।










## वृत्तपरिस्पन्दः






**శారీరక, మానసిక దృఢత్వానికి క్రీడలు**

యూనివర్సిటీ క్యాంపస్: శారీరక, మానసిక దృఢత్వానికి క్రీడలు ఎంతగానో ఉపకరిస్తాయని రాష్ట్రీయ సంస్కృత విద్యాపీఠం ఉపకులపతి వి.మురళీధరశర్మ అన్నారు. శనివారం విద్యాపీఠంలోని ఇండోర్ స్టేడియంలో విద్యార్థులు, అధ్యాపకులకు క్రీడా పోటీలు నిర్వహించారు. ఈ పోటీలను వీసీ ప్రారంభించి మాట్లాడారు. ఫిజికల్ ఫిట్‌నెస్ కోసం ఏమేం చేయాలో వ్యాయామ విభాగం అసిస్టెంట్ డైరెక్టర్ వి.సేతురామ్ వివరించారు. వైష్ణవి కో-ఆర్డినేటర్‌గా వ్యవహరించారు. కార్యక్రమంలో ప్రొఫెసర్ ఆర్.జోషి, రాధాగోవిందన్ త్రిపాఠి, డి.జ్యోతి, వై.విజయలక్ష్మి, లీనాచంద్ర, మారవరావు పాల్గొన్నారు.

రన్నింగ్ చేస్తున్న విద్యార్థులు

**విద్యాపీఠం ఇండోర్ స్టేడియంలో క్రీడలు ప్రారంభం**

# अभिनयकला-अनुवादविभागयोः उद्घाटनम्



विद्यापीठे ऐदंप्राथम्येन मान्यकुलपतीनां प्रकल्पनया अनुवादविभागः (Department of Translation), तथा च अभिनयकलाविभागः (Department of Performing Arts) मानवसंसाधनविकास-मन्त्रालयस्य मान्यवरमन्त्रिमहोदयैः श्रीयुक्तपोखरियालमहोदयैः तिरुपतिलोकसभासदस्यानां बल्लिदुर्गाप्रसादरावुमहोदयानां तथा विद्यापीठस्य महामान्यकुलाधिपति-कुलपति-कुलसचिव-सङ्कायप्रमुख-समेतानां विद्यापीठीयकर्मचारिणां समुपस्थितौ संस्कृतनवरात्रसमुद्घाटनसमवसरे उद्घाटितः । अभिनयकलाविभागे नवनियुक्तानां सङ्गीत-नृत्य-वादननिपुणानामध्यापकानां कलापरिवेषणकार्यक्रमः परवर्तिपर्याये समायोजितः । यस्मिन् कार्यक्रमे मान्याः सेवानिवृत्ताः प्रशासनाधिकारिणः **मुक्तेश्वररावमहोदयाः** मुख्यातिथित्वेन समागत्य सङ्गीत-नृत्य-वाद्यानां महत्त्वं प्रतिपाद्य कलानिपुणान् अध्यापकान् अभ्यनन्दत् तथा च एतासु कलासु रुचिं स्थापयितुं छात्रान् प्राबोधयन् ।









## पञ्चचत्वारिंशद्दिनात्मकं योगचिकित्साशिबरम्
## (दिनाङ्कः - ०५.०५.२०१७तः २१.०६.२०१७)

"शरीरं रोगमन्दिरम्" इति शास्त्रेषु प्रसिद्धिः वर्तते । अधुना दूषित-वातावरणेन पीडिताः मानवाः विविधैः रोगैः ग्रस्ताः भवन्ति । जीवाणु-भूताणुभिः व्याप्ताः रोगाः कदाचित् औषधैः निराकर्तुं शक्यन्ते ; किन्तु तद्भिन्नाः शिरोवेदना, रक्तचापः, शरीरवेदना, मधुमेह इत्यादयः रोगाः योगमाध्यमेन दूरीकर्तुं शक्यन्ते इति योगविदामभिप्रायः ।



अस्मिन् प्रसङ्गे विद्यापीठस्य योगचिकित्साकेन्द्रपक्षतः पञ्चचत्वारिंशद् दिनात्मकं योगचिकित्साशिबिरं विद्यापीठप्राङ्गणे समायोजितम् । अस्य प्रमुखमुद्देश्यमासीत् "स्वस्थतिरुपतिः" । अर्थात् यथा सर्वेऽपि तिरुपतिवासिनः रोगमुक्ताः भवेयुः तदर्थं विविधानां योगासनानां शिक्षणं प्रदत्तम् । विशिष्टतया चतुर्णां दुःसाध्यरोगाणां चिकित्सार्थं योगप्रशिक्षणमिदं सञ्चालितम् । यथा — (१) मधुमेहः :(२) उंच्चरक्तचापः (३) निम्नपृष्ठवेदना (४) स्त्रीसम्बन्धिरोगाश्च ।



कार्यक्रमस्य समुद्घाटनसमारोहे चित्तूरजिल्लापालनाधिकारि-श्रीप्रद्युम्न-महोदयाः मुख्यातिथिरूपेण उपस्थिता आसन् । स्वीयभाषणे इमे वेदकालात् योगाभ्यासप्रक्रिया प्रचलतीति उक्त्वा संस्कृताध्ययनेन योगशास्त्रस्य अध्ययनं सम्यक् कर्तुं शक्यते इति संस्कृतभाषायाः महत्त्वं प्राकटयन् । तिरुमलतिरुपतिदेवस्थानस्य प्रकल्पाधिकारिणः श्री एन्.मुक्तेश्वररावमहोदयाः गौरवातिथिरूपेण समाहूता आसन् । आहार-व्यवहारद्वारा एव स्वास्थ्य-सम्पादनं कर्तुं शक्यते इति ते स्वीयभाषणे प्राबोधयन् ।

"सर्वस्मै विश्वाय योगशास्त्रं भारतप्रदत्तमुपायनम्" इति कुलपतयः समुदघोषयन् । भारतस्य महनीयता योग-दर्शन-आयुर्वेदाख्येषु त्रिषु शास्त्रेषु सन्निहिताऽस्तीति तैरुक्तम् ।

योगचिकित्साकेन्द्रस्य निदेशकाः डॉ.राजेन्द्ररेड्डीमहोदयाः सम्पूर्णस्य कार्यक्रमस्य संयोजका आसन् । विद्यापीठच्छात्राः, अध्यापकाः, तिरुपति-नागरिकाः विपुलसंख्यया कार्यक्रमेऽस्मिन् भागं गृहीत्वा लाभान्विताः अभूवन् । अत्र १०२ संख्याकाः व्याधिपीडिताः जनाः अचिकित्स्यन्त ।

शिबिरस्यास्य समापनसमारोहः अन्ताराष्ट्रीययोगदिवसपरिपालनावसरे (२१-०६-२०१७) समन्वष्ठीयत । अत्र विद्यापीठस्य अद्वैतवेदान्तविभागस्य आचार्याः प्राक्तनकुलपतयः आचार्य एम्.एल्.एन्.मूर्त्तिमहाभागाः, तथा च दूरशिक्षाकेन्द्रस्य निदेशका आचार्य सिएच्.पि.सत्यनारायणमहोदयाः विशिष्टातिथिरूपेण समाहूयेताम् । प्रसङ्गेऽस्मिन् विद्यापीठप्राङ्गणे प्रतिष्ठापितस्य पतञ्जलिविग्रहस्य पूजाऽपि व्यधायि ।

## अन्ताराष्ट्रिययोगदिवससमारोहः (दिनाङ्कः - २१.०६.२०१७)



समारोहं समुद्घाटयन्तः आचार्य एम्.एल्.एन्.मूर्त्तिसमेताः आचार्य वि.मुरलीधरशर्म-आचार्य सिएच्.पि.सत्यनारायणमहोदयाः



उत्सवे भागग्रहीतृभिः योगकौशलप्रदर्शनम्